श्री नारायण स्तोत्रं (मृगशृंग कृतं)

श्री नारायण स्तोत्रं (मृगशृंग कृतं)

मृगशृंग उवाच |
नारायणाय नलिनायतलोचनाय
नाथाय पत्ररथनायकवाहनाय |
नाळीकसद्मरमणीयभुजांतराय
नव्यांबुदाभरुचिराय नमः परस्मै || 1 ||

ॐ नमो वासुदेवाय लोकानुग्रहकारिणे |
धर्मस्य स्थापनार्थाय यथेच्छवपुषे नमः || 2 ||

सृष्टिस्थित्यनुसंहारान् मनसा कुर्वते नमः |
संहृत्य सकलान् लोकान् शायिने वटपल्लवे || 3 ||

सदानंदाय शांताय चित्स्वरूपाय विष्णवे |
स्वेच्छाधीनचरित्राय निरीशायेश्वराय च || 4 ||

मुक्तिप्रदायिने सद्यो मुमुक्षूणां महात्मनां |
वसते भक्तचित्तेषु हृदये योगिनामपि || 5 ||

चराचरमिदं कृत्स्नं तेजसा व्याप्य तिष्ठते |
विश्वाधिकाय महतो महतेऽणोरणीयसे || 6 ||

स्तूयमानाय दांताय वाक्यैरुपनिषद्भवैः |
अपारघोरसंसारसागरोत्तारहेतवे || 7 ||

नमस्ते लोकनाथाय लोकातीताय ते नमः |
नमः परमकळ्याणनिधये परमात्मने || 8 ||

अच्युतायाप्रमेयाय निर्गुणाय नमो नमः |
नमः सहस्रशिरसे नमः सततभास्वते || 9 ||

नमः कमलनेत्राय नमोऽनंताय विष्णवे |
नमस्त्रिमूर्तये धात्रे नमस्त्रियुगशक्तये || 10 ||

नमः समस्तसुहृदे नमः सततजिष्णवे |
शंखचक्रगदापद्मधारिणे लोकधारिणे || 11 ||

स्फुरत्किरीटकेयूरमुकुटांगदधारिणे |
निर्द्वंद्वाय निरीहाय निर्विकाराय वै नमः || 12 ||

पाहि मां पुंडरीकाक्ष शरण्य शरणागतं |
त्वमेव सर्वभूतानामाश्रयः परमा गतिः || 13 ||

त्वयि स्थितं यथा चित्तं न मे चंचलतां व्रजेत् |
तथा प्रसीद देवेश शरण्यं त्वाऽऽगतोऽस्म्यहं |
नमस्तुभ्यं नमस्तुभ्यं भूयो भूयो नमो नमः || 14 ||

इति श्रीपद्मपुराणे उत्तरखंडे द्वाविंशत्यधिकद्विशततमोऽध्याये मृगशृंग कृत श्री नारायण स्तोत्रं ||